

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## पञ्चमकाण्डे प्रथमः प्रश्नः

### उख्याग्निकथनं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति चतुष्पादः पशवः पशूनेवाऽव रुन्धे चतस्रो
दिशो दिख्ष्वेव प्रति तिष्ठति छन्दाꣳसि देवेभ्योऽपाऽक्रामन् न वोऽभागानि हव्यँव्वँख्ष्याम
इति तेभ्य एतच्चतुर्गृहीतमधारयन् पुरोनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतञ्जु-
होति छन्दाꣳस्येव तत् प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यँव्वँहन्ति यङ्कामयेत ॥ [१] ॥
पापीयान्थ्स्यादित्येकैकन्तस्य जुहुयादाहुतीभिरेवैनमप गृह्णाति पापीयान् भवति यङ्कामयेत
वसीयान्थ्स्यादिति सर्वाणि तस्याऽनुद्रुत्य जुहुयादाहुत्यैवैनमभि क्रमयति वसीयान् भवत्यथो
यज्ञस्यैवैषाऽभिक्रान्तिरेति वा एष यज्ञमुखादृद्ध्या योऽग्नेर् देवताया एत्यष्टावेतानि सावित्राणि
भवन्त्यष्टाख्षरा गायत्री गायत्रो ॥ [२] ॥ ऽग्निस्तेनैव यज्ञमुखादृद्ध्या अग्नेर् देवतायै नैत्यष्टौ
सावित्राणि भवन्त्याहुतिर् नवमी त्रिवृतमेव यज्ञमुखे वि यातयति यदि कामयेत छन्दाꣳसि यज्ञ-
यशसेनाऽर्पयेयमित्यृचमन्तमाङ्कुर्याच्छन्दाꣳस्येव यज्ञयशसेनाऽर्पयति यदि कामयेत यज-
मानय्ँयज्ञयशसेनाऽर्पयेयमिति यजुरन्तमङ्कुर्याद्यजमानमेव यज्ञयशसेनाऽर्पयत्यृचा स्तोमꣳ
समर्द्धयेत्या ॥ [३] ॥ ह समृद्ध्यै चतुर्भिरभ्रिमा दत्ते चत्वारि छन्दाꣳसि छन्दोभिरेव देवस्य
त्वा सवितुः प्रसव इत्याह प्रसूत्या अग्निर् देवेभ्यो निलायत स वेणुम्प्राऽविशथ् स एतामूतिमनु
समचरद्यद्वेणोः सुषिरꣳ सुषिराऽभ्रिर् भवति सयोनित्वाय स यत्रयत्राऽवसत् तत् कृष्णमभवत्
कल्माषी भवति रूपसमृद्ध्या उभयतःख्ष्णूर् भवतीतश्चाऽमुतश्चाऽर्कस्यावरुद्ध्यै व्याममात्री

भवत्येतावद् वै पुरुषे वीर्यँव्वीर्यसम्मिताऽपरिमिता भवत्यपरिमितस्याऽवरुद्ध्यै यो वनस्पतीनाम्फलग्रहिः स एषाँव्वीर्यावान् फलग्रहिर् वेणुर् वैणवी भवति वीर्यस्यावरुद्ध्यै ॥ [४] ॥

(कामयेत गायत्रीँर् ऽद्धयेति च सप्तविꣳशतिश्च) ॥ १ ॥

---

व्यृद्धँव्वा एतद्यज्ञस्य यद्यजुष्केण क्रियत इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमा दत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै प्रतूर्तँव्वाजिन्ना द्रवेत्यश्वमभि दधाति रूपमेवास्यैतन् महिमानँव्व्याचष्टे युञ्जाथाꣳ रासभँय्युवमिति गर्दभमसत्येव गर्दभम्प्रति ष्ठापयति तस्मादश्वाद्गर्दभोऽसत्तरो योगेयोगे तवस्तरमित्याह ॥ [५] ॥ योगेयोग एवैनँय्युङ्क्ते वाजेवाजे हवामह इत्याहान्नँव्वै वाजोऽन्नमेवाव रुन्धे सखाय इन्द्रमूतय इत्याहेन्द्रियमेवाव रुन्धेऽग्निर् देवेभ्यो निलायत तम्प्रजापतिरन्वविन्दत् प्राजापत्योऽश्वोऽश्वेन सम्भरत्यनुवित्त्यै पापवस्यसँव्वा एतत् क्रियते यच्छ्रेयसा च पापीयसा च समानङ्कर्म कुर्वन्ति पापीयान् ॥ [६] ॥ ह्यश्वाद्गर्दभोऽश्वम्पूर्वन्नयन्ति पापवस्यसस्य व्यावृत्त्यै तस्माच्छ्रेयाꣳसम्पापीयान् पश्चादन्वेति बहुर् वै भवतो भ्रातृव्यो भवतीव खलु वा एष योँऽग्निञ्चिनुते वज्र्यश्वः प्रतूर्वन्नेह्यवक्रामन्नशस्तीरित्याह वज्रेणैव पाप्मानम्भ्रातृव्यमव क्रामति रुद्रस्य गाणपत्यादित्याह रौद्रा वै पशवो रुद्रादेव ॥ [७] ॥ पशून् निर्याच्याऽऽ*त्मने कर्म कुरुते पूष्णा सयुजा सहेत्याह पूषा वा अद्ध्वनाꣳ संनेता समष्ट्यै पुरीषायतनो वा एष यदग्निरङ्गिरसो वा एतमग्रे देवतानाꣳ समभरन् पृथिव्याः सधस्थादग्निम्पुरीष्यमङ्गिरस्वदच्छेहीत्याह सायतनमेवैनन्देवताभिः सम्भरत्यग्निं पुरीष्यमङ्गिरस्वदच्छेम इत्याह येन ॥ [८] ॥ सङ्गच्छते वाजमेवऽस्य वृङ्क्ते प्रजापतये प्रतिप्रोच्याग्निः संभृत्य इत्याहुरियँव्वै प्रजापतिस्तस्या एतच्छ्रोत्रँय्यद् वल्मीकोऽग्निम्पुरीष्यमङ्गिरस्वद्भरिष्याम इति वल्मीकवपामुप तिष्ठते साक्षादेव प्रजापतये प्रतिप्रोच्याऽग्निꣳ सम्भरत्यग्निम्पुरीष्यमङ्गिरस्वद्भराम इत्याह येन संगच्छते वाजमेवास्य वृङ्क्तेऽन्वग्निरुषसामग्र ॥ [९] ॥ मख्यदित्याहानुख्यात्या आगत्य वाज्यद्ध्वन आक्रम्य वाजिन् पृथिवीमित्याहेच्छत्येवैनम्पूर्वया विन्दत्युत्तरया द्वाभ्यामा क्रमयति प्रतिष्ठित्या अनुरूपाभ्यान्तस्मादनुरूपाः पशवः प्र जायन्ते द्यौ स्ते पृष्ठम्पृथिवी सधस्थमित्याहैभ्यो वा एतल्लोँकेभ्यः प्रजापतिः समैरयद् रूपमेवास्यैतन्महिमानँव्व्याचष्टे वज्री वा

एष यदश्वो दद्भिरन्यतोदद्भ्यो भूयाँल्लोमभिरुभयादद्भ्यो यन्द्विष्यात् तमधस्पदन्ध्यायेद्वज्रेणैवैनꣳ स्तृणुते ॥ [१०] ॥

(आह पापीयान् रुद्रादेव येना ग्रं वज्री वै सप्त दश च) ॥ २ ॥

उत् क्रामोदक्रमीदिति द्वाभ्यामुत् क्रमयति प्रतिष्ठित्या अनुरूपाभ्यान्तस्मादनुरूपाः पशवः प्र जायन्तेऽप उप सृजति यत्र वा आप उपगच्छन्ति तदोषधयः प्रति तिष्ठन्त्योषधीः प्रतितिष्ठन्तीः पशवोऽनु प्रति तिष्ठन्ति पशूनयज्ञो यज्ञय्ँयजमानो यजमानम्प्रजास्तस्मादप उप सृजति प्रतिष्ठित्यै यदद्ध्वर्युरनग्नावाहुतिञ्जुहुयादन्धोऽद्ध्वर्युः ॥ [११] ॥ स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽद्ध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति जिघर्म्यग्निम्मनसा घृतेनेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति प्रतिरक्ष्यन्तम्भुवनानि विश्वेत्याह सर्वꣳ ह्येष प्रत्यङ् रक्षेति पृथुन्तिरश्चा वयसा बृहन्तमित्याहाऽल्पो ह्येष जातो महान् ॥ [१२] ॥ भवति व्यचिष्ठमन्नꣳ रभसव्ँविदानमित्याहाऽन्नमेवाऽस्मै स्वदयति सर्वमस्मै स्वदते य एवव्ँवेदाऽऽत्वा जिघर्मि वचसा घृतेनेत्याह तस्माद्यत् पुरुषो मनसाऽभिगच्छति तद्वाचा वदत्यरक्षसेत्याह रक्षसामपहत्यै मर्यश्रीः स्पृहयद्वर्णो अग्निरित्याहापचितिमेवाऽस्मिन् दधात्यपचितिमान् भवति य एव ॥ [१३] ॥ व्ँवेद मनसा त्वै तामाप्तुमर्हति यामद्ध्वर्युरनग्नावाहुतिञ्जुहोति मनस्वतीभ्यां जुहोत्याहुत्योराप्त्यै द्वाभ्याम्प्रतिष्ठित्यै यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येतर्हि खलु वा एतद्यज्ञमुखय्ँयर्हैनदाहुतिरश्नुते परि लिखति रक्षसामपहत्यै तिसृभिः परि लिखति त्रिवृद्वा अग्निर्यावानेवाऽग्निस्तस्माद्रक्षाꣳस्यप हन्ति ॥ [१४] ॥ गायत्रिया परि लिखति तेजो वै गायत्री तेजसैवैनम्परि गृह्णाति त्रिष्टुभा परि लिखतीन्द्रियव्ँवै त्रिष्टुगिन्द्रियेणैवैनम्परि गृह्णात्यनुष्टुभा परि लिखत्यनुष्टुफ् सर्वाणि छन्दाꣳसि परिभूः पर्याप्त्यै मद्ध्यतोऽनुष्टुभा वाग्वा अनुष्टुप् तस्मान् मद्ध्यतो वाचा वदामो गायत्रिया प्रथमया परि लिखत्यथाऽनुष्टुभाऽथ त्रिष्टुभा तेजो वै गायत्री यज्ञोऽनुष्टुगिन्द्रियन्त्रिष्टुप् तेजसा चैवेन्द्रियेण चोभयतो यज्ञम्परि गृह्णाति ॥ [१५] ॥

(अन्धोऽद्ध्वर्युर्महान् भवति य एवꣳ हन्ति त्रिष्टुभा तेजो वै गायत्री त्रयोदश च) ॥ ३ ॥

देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूममेवैतेन जनयति ज्योतिष्मन्तन्त्वाऽग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति सोऽग्निर् जातः प्रजाः शुचाऽऽर्पयत् तन्देवा अर्द्धर्चे-नाशमयञ्छिवम्प्रजाभ्योऽहिꣳसन्तमित्याह प्रजाभ्य एवैनꣳ शमयति द्वाभ्याङ्खनति प्रतिष्ठित्या अपाम्पृष्ठमसीति पुष्करपर्णमा ॥ [१६] ॥ हरत्यपाँवा एतत् पृष्ठय्यँत् पुष्करपर्णꣳ रूपेणै-वैनदा हरति पुष्करपर्णेन सम्भरति योनिर् वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निꣳ सम्भरति कृष्णाजिनेन सम्भरति यज्ञो वै कृष्णाजिनय्यँज्ञेनैव यज्ञꣳ सम्भरति यद् ग्राम्याणाम्पशूनाञ्च-र्मणा संभरेद् ग्राम्यान् पशूञ्छुचाऽर्पयेत् कृष्णाजिनेन सम्भरत्यारण्यानेव पशू ॥ [१७] ॥ ञ्छुचाऽर्पयति तस्मात् समावत् पशूनाम्प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा ह्यृता लोमतः सम्भरत्यतो ह्यस्य मेध्यङ्कृष्णाजिनञ्च पुष्करपर्णञ्च सङ्स्तृणातीयव्वै कृष्णाजिन-मसौ पुष्करपर्णमाभ्यामेवैनमुभयतः परि गृह्णात्यग्निर् देवेभ्यो निलायत तमथर्वाऽन्वपश्यद-थर्वा त्वा प्रथमो निरमन्थदग्न इत्या ॥ [१८] ॥ ह य एवैनमन्वपश्यत् तेनैवैनꣳ सम्भरति त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमविन्दत् तमु त्वा दध्यङ्ङृषिरित्याह दध्यङ्वा आथर्वणस्तेजस्व्यासीत् तेज एवास्मिन् दधाति तमु त्वा पाथ्यो वृषेत्याह पूर्वमेवोदितमुत्तरेणाभि गृणाति ॥ [१९] ॥ चतसृभिः सम्भरति चत्वारि छन्दाꣳसि छन्दोभिरेव गायत्रीभिर् ब्राह्मणस्य गायत्रो हि ब्राह्मण स्त्रिष्टुग्भी राजन्यस्य त्रैष्टुभो हि राजन्यो यङ्कामयेत वसीयान्थ्स्यादित्युभयी-भिस्तस्य सं भरेत् तेजश्चैवाऽस्मा इन्द्रियञ्च समीची दधात्यष्टाभिः सम्भरत्यष्टाक्षरा गायत्री गायत्रोऽग्निर् यावानेवाऽग्निस्तꣳ सम्भरति सीद होतरित्या ह देवता एवास्मै सꣳ सादयति नि होतेति मनुष्यान्थ् सꣳ सीदस्वेति वयाꣳसि जनिष्वा हि जेन्यो अग्रे अह्नामित्याह देवमनुष्याने-वास्मै सꣳसन्नान् प्र जनयति ॥ [२०] ॥

(ऐ व पशू निति गृणाति होतरिति सप्तविꣳशतिश्च) ॥ ४ ॥

क्रूरमिव वा अस्या एतत् करोति यत् खनत्यप उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्यै शुचꣳ शमयति सन्ते वायुर् मातरिश्वा दधात्वित्याह प्राणो वै वायुः प्राणेनैवास्यै प्राणꣳ सन्द-

धाति सन्तं वायुरित्याह तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते तस्मै च देवि वषडस्तु ॥ [२१] ॥
तुभ्यमित्याह षड् वा ऋतव ऋतुष्वेव वृष्टिन्दधाति तस्माथ् सर्वानृतून्वर्षति यद्वषट्कुर्याद्या-
तयामाऽस्य वषट्कारः स्याद् यन्न वषट्कुर्याद् रख्षाꣳसि यज्ञꣳ हन्युर् वडित्याह परोख्षमेव
वषट् करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रख्षाꣳसि घ्नन्ति सुजातो ज्योतिषा
सहेत्यनुष्टुभोप नह्यत्यनुष्टु ॥ [२२] ॥ फ्सर्वाणि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया
तनूः प्रिययैवैनन्तनुवा परि दधाति वेदुको वासो भवति य एवव्वेँद वारुणो वा अग्निरुपनद्ध
उदु तिष्ठ स्वद्ध्वरोद्ध्वं ऊ षु णं ऊतय इति सावित्रीभ्यामुत् तिष्ठति सवितृप्रसूत एवास्यो-
द्ध्वाँव्वँरुणमेनिमुथ् सृजति द्वाभ्याम्प्रतिष्ठित्यै स जातो गर्भो असि ॥ [२३] ॥ रोदस्योरि-
त्याहेमे वै रोदसी तयोरेष गर्भो यदग्निस्तस्मादेवमाहाग्ने चारुर् विभृत ओषधीष्वित्याह यदा
ह्येतव्विँभरन्त्यथ चारुतरो भवति प्र मातृभ्यो अधि कनिक्रदद्गा इत्याहौषधयो वा अस्य मात-
रस्ताभ्य एवैनम्प्र च्यावयति स्थिरो भव वीड्वङ्ग इति गर्दभ आ सादयति ॥ [२४] ॥ सन्नह्य-
त्येवैनमेतया स्थेम्ने गर्दभेन सम्भरति तस्माद् गर्दभः पशूनाम्भारभारितमो गर्दभेन सम्भरति
तस्माद् गर्दभोऽप्यनालेशेऽत्यन्यान् पशून् मेद्यत्यन्नꣳ ह्येनेनाऽर्कꣳ संभरन्ति गर्दभेन सम्भरति
तस्माद् गर्दभो द्विरेताः सन् कनिष्ठम्पशूनाम्प्र जायतेऽग्निर् ह्यस्य योनिन्निर्दहति प्रजासु वा एष
एतर्ह्यारूढः ॥ [२५] ॥ स ईश्वरः प्रजाः शुचा प्रदहः शिवो भव प्रजाभ्य इत्याह प्रजाभ्य
एवैनꣳ शमयति मानुषीभ्यस्त्व मङ्गिर इत्याह मानव्यो हि प्रजा मा द्यावापृथिवी अभि शूशुचो
माऽन्तरिख्षम्मा वनस्पतीनित्याहैभ्य एवैनँल्लोकेभ्यः शमयति प्रैतु वाजी कनिक्रददित्याह वाजी
ह्येष नानदद्रासभः पत्वेत्या ॥ [२६] ॥ ह रासभ इति ह्येतमृषयोऽवदन् भरन्नग्निम्पुरीष्य-
मित्याहाऽग्निꣳ ह्येष भरति मा पाद्यायुषः पुरेत्याहाऽऽयुरेवाऽस्मिन् दधाति तस्माद् गर्दभः
सर्वमायुरेति तस्माद् गर्दभे पुराऽऽयुषः प्रमीते बिभ्यति वृषाऽग्निव्वृँषणम्भरन्नित्याह वृषा ह्येष
वृषाऽग्निरपाङ्गर्भꣳ ॥ [२७] ॥ समुद्रियमित्याहाऽपाꣳ ह्येष गर्भो यदग्निरग्न आ याहि वीतय
इति वा इमौ लोकौ व्यैतामग्न आ याहि वीतय इति यदाहाऽनयोर् लोकयोर् वीत्यै प्रच्युतो
वा एष आयतनादगतः प्रतिष्ठाꣳ स एतर्ह्यद्ध्वर्युञ्च यजमानञ्च ध्यायत्यृतꣳ सत्यमित्याहेयँवा
ऋतमसौ ॥ [२८] ॥ सत्यमनयोरेवैनम्प्रति ष्ठापयति नाऽऽर्तिमार्च्छत्यद्ध्वर्युर् न यजमानो

वरुणो वा एष यजमानमभ्यैति यदग्निरुपनद्ध ओषधयः प्रति गृह्णीताग्निमेतमित्याह शान्त्यै
व्यस्यन् विश्वा अमतीररातीरित्याह रक्षसामपहत्यै निषीदन् नो अप दुर्मतिꣳ हनदित्याह प्रति-
ष्ठित्या ओषधयः प्रति मोदद्ध्व ॥ [२९] ॥ मेनमित्याहौषधयो वा अग्नेर् भागधेयन्ताभिरे-
वैनꣳ समर्द्धयति पुष्पावतीः सुपिप्पला इत्याह तस्मादोषधयः फलङ्गृह्णन्त्ययँव्वो गर्भ ऋत्वियः
प्रत्नꣳ सधस्थमाऽसददित्याह याभ्य एवैनम्प्रच्यावयति तास्वेवैनम्प्रति ष्ठापयति द्वाभ्यामुपावह-
रति प्रतिष्ठित्यै ॥ [३०] ॥

(अस्त्व नुष्टु बसि सादयत्या रूढः पत्वेतिगर्भमसौमोदद्ध्वं द्विचत्वारिꣳशच्च) ॥ ५ ॥

वारुणो वा अग्निरुपनद्धो वि पाजसेति वि स्रꣳसयति सवितृप्रसूत एवास्य विषूचीँव्वरुणमे-
निर्व्वि सृजत्यप उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्य शुचꣳ शमयति तिसृभिरुप सृजति
त्रिवृद् वा अग्निर् यावानेवाग्निस्तस्य शुचꣳ शमयति मित्रः सꣳसृज्य पृथिवीमित्याह मित्रो
वै शिवो देवानान्तेनैवै ॥ [३१] ॥ नꣳ सꣳ सृजति शान्त्यै यद् ग्राम्याणाम्पात्राणाङ्कपालैः
सꣳसृजेद्ग्राम्याणि पात्राणि शुचाऽर्पयेदर्मकपालैः सꣳ सृजत्येतानि वा अनुपजीवनीयानि तान्येव
शुचाऽर्पयति शर्कराभिः सꣳ सृजति धृत्या अथो शन्त्वायाजलोमैः सꣳ सृजत्येषा वा अग्नेः प्रिया
तनूर् यदजा प्रिययैवैनन्तनुवा सꣳ सृजत्यथो तेजसा कृष्णाजिनस्य लोमभिः सꣳ ॥ [३२] ॥
सृजति यज्ञो वै कृष्णाजिनँय्यज्ञेनैव यज्ञꣳ सꣳ सृजति रुद्राः संभृत्य पृथिवीमित्याहैता वा एतन्दे-
वता अग्रे समभरन् ताभिरेवैनꣳ सम्भरति मखस्य शिरोऽसीत्याह यज्ञो वै मखस्तस्यैतच्छिरो
यदुखा तस्मादेवमाह यज्ञस्य पदे स्थ इत्याह यज्ञस्य ह्येते ॥ [३३] ॥ पदे अथो प्रतिष्ठित्यै
प्रान्याभिर् यच्छत्यन्वन्यैर् मन्त्रयते मिथुनत्वाय त्र्युद्धिङ्करोति त्रय इमे लोका एषाँल्लोकाना-
माप्त्यै छन्दोभिः करोति वीर्यँव्वै छन्दाꣳसि वीर्येणैवैनाङ्करोति यजुषा बिलङ्करोति व्यावृत्त्या इय-
तीङ्करोति प्रजापतिना यज्ञमुखेन संमितान्द्विस्तनाङ्करोति द्यावापृथिव्योर् दोहाय चतुःस्तनाङ्क-
रोति पशूनान्दोहायाष्टास्तनाङ्करोति छन्दसान्दोहाय नवाश्रिमभिचरतः कुर्यात् त्रिवृतमेव वज्रꣳ
संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै कृत्वाय सा महीमुखामिति नि दधाति देवतास्वेवैनाम्प्रति
ष्ठापयति ॥ [३४] ॥

(तेनैव लोमभिः स मेते अभिचरत एकविꣳशतिश्च) ॥ ६ ॥

सप्तभिर् धूपयति सप्त वै शीर्षण्याः प्राणाः शिर एतद्यज्ञस्य यदुखा शीर्षन्नेव यज्ञस्य प्राणान् दधाति तस्मात्थ् सप्त शीर्षन् प्राणा अश्वशकेन धूपयति प्राजापत्यो वा अश्वः सयोनित्वायादितिस्त्वेत्याहेयव्वाँ अदितिरदित्यैवादित्याङ्खनत्यस्या अक्रूरंकाराय न हि स्वः स्वꣳ हिनस्ति देवानान्त्वा पत्नीरित्याह देवाना ॥ [३५] ॥ व्वाँ एताम्पत्नयोऽग्रेऽकुर्वन् ताभिरेवैनान्दधाति धिषणास्त्वेत्याह विद्या वै धिषणा विद्याभिरेवैनामभीन्धे ग्ना स्त्वेत्याह छन्दाꣳसि वै ग्ना श्छन्दोभिरेवैनाꣳ श्रपयति वरूत्रयस्त्वेत्याह होत्रा वै वरूत्रयो होत्राभिरेवैनाम्पचति जनयस्त्वेत्याह देवानाव्वैँ पत्नीर् ॥ [३६] ॥ जनयस्ताभिरेवैनाम्पचति षड्भिः पचति षड् वा ऋतव ऋतुभिरेवैनाम्पचति द्विः पचन्त्वित्याह तस्माद् द्विः सव्वँथ्सरस्य सस्यम्पच्यते वारुण्युखाऽभीद्धा मैत्रियोपैति शान्त्यै देवस्त्वा सवितोद् वपत्वित्याह सवितृप्रसूत एवैनाम्ब्रह्मणा देवताभिरुद्वपत्यपद्यमाना पृथिव्याशा दिश आ पृणे ॥ [३७] ॥ त्याह तस्मादग्निः सर्वा दिशोऽनु वि भात्युत् तिष्ठ बृहती भवोद्ध्वा तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्या असुर्यम्पात्रमनाच्छृण्णमा च्छृणत्ति देवत्राऽकरजक्षीरेणाऽऽच्छृणत्ति परमव्वाँ एतत् पयो यदजक्षीरम्परमेणैवैनाम्पयसाऽऽच्छृणत्ति यजुषा व्यावृत्त्यै छन्दोभिरा च्छृणत्ति छन्दोभिर् वा एषा क्रियते छन्दोभिरेव छन्दाꣳस्या च्छृणत्ति ॥ [३८] ॥

(आह देवानांवै पत्नीःपृणै षा षट् च) ॥ ७ ॥

एकविꣳशत्या माषैः पुरुषशीर्षमच्छैत्यमेद्ध्या वै माषा अमेद्ध्यम्पुरुषशीर्षममेद्ध्यैरेवास्यामेद्ध्यन्निरवदाय मेद्ध्यङ्कृत्वाऽऽहरत्येकविꣳशतिर् भवन्त्येकविꣳशो वै पुरुषः पुरुषस्याऽऽप्त्यै व्यृद्धव्वाँ एतत् प्राणैरमेद्ध्यय्यँत् पुरुषशीर्षꣳ सप्तधा वितृण्णाव्वँल्मीकवपाम्प्रति नि दधाति सप्त वै शीर्षण्याः प्राणाः प्राणैरेवैनथ्समर्द्धयति मेद्ध्यत्वाय यावन्तो ॥ [३९] ॥ वै मृत्युबन्धवस्तेषाय्यँम आधिपत्यम्परीयाय यमगाथाभिः परि गायति यमादेवैनद्वृङ्क्ते तिसृभिः

परि गायति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो वृङ्क्ते तस्माद्वायते न देयङ्गाथा हि तद्वृङ्क्तेऽग्निभ्यः
पशूना लभते कामा वा अग्नयः कामानेवाव रुन्धे यत् पशून् नाऽऽ*लभेताऽनवरुद्धा अस्य
॥ [४०] ॥ पशवः स्युर् यत् पर्यग्निकृतानुथ्सृजेद्यज्ञवेशसङ्कुर्याद्यथ् सङ्स्थापयेद्यातयामानि
शीर्षाणि स्युर् यत् पशूनालभते तेनैव पशूनव रुन्धे यत् पर्यग्निकृतानुथ्सृजति शीर्ष्णामयात-
यामत्वाय प्राजापत्येन सङ् स्थापयति यज्ञो वै प्रजापतिर् यज्ञ एव यज्ञम्प्रति ष्ठापयति प्रजापतिः
प्रजा असृजत स रिरिचानोऽमन्यत स एता आप्रीरपश्यत् ताभिर् वै स मुखत ॥ [४१] ॥
आत्मानमाऽप्रीणीत यदेता आप्रियो भवन्ति यज्ञो वै प्रजापतिर् यज्ञमेवैताभिर् मुखत आ प्रीणा-
त्यपरिमितछन्दसो भवन्त्यपरिमितः प्रजापतिः प्रजापतेराप्त्या ऊनातिरिक्ता मिथुनाः प्रजात्यै
लोमशव्वै नामैतच्छन्दः प्रजापतेः पशवो लोमशाः पशूनेवाऽव रुन्धे सर्वाणि वा एता रूपाणि
सर्वाणि रूपाण्यग्नौ चित्ये क्रियन्ते तस्मादेता अग्नेश्चित्यस्य ॥ [४२] ॥ भवन्त्येकविꣳशतिꣳ
सामिधेनीरन्वाह रुग् वा एकविꣳशो रुचमेव गच्छत्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविꣳशश्चतुर्विꣳ-
शतिमन्वाह चतुर्विꣳशतिरर्द्धमासाः सँव्वथ्सरः सँव्वथ्सरोऽग्निर् वैश्वानरः साक्षादेव वैश्वा-
नरमव रुन्धे पराचीरन्वाह पराङिव हि सुवर्गो लोकः समास्त्वाऽग्न ऋतवो वर्द्धयन्त्वित्याह
समाभिरेवाऽग्निँव्वर्द्धय ॥ [४३] ॥ त्यृतुभिः संवँथ्सरव्विश्वा आ भाहि प्रदिशः पृथिव्या इत्याह
तस्मादग्निः सर्वा दिशोऽनु वि भाति प्रत्यौहतामश्विना मृत्युमस्मादित्याह मृत्युमेवाऽस्मादप
नुदत्युद् वयन्तमसस्परीत्याह पाप्मा वै तमः पाप्मानमेवास्मादप हन्त्यगन्म ज्योतिरुत्तममि-
त्याहाऽसौ वा आदित्यो ज्योतिरुत्तम मादित्यस्यैव सायुज्यङ्गच्छति न सँव्वथ्सरस्तिष्ठति नास्य
श्रीस्तिष्ठति यस्यैताः क्रियन्ते ज्योतिष्मतीमुत्तमामन्वाह ज्योतिरेवास्मा उपरिष्टाद् दधाति सुव-
र्गस्य लोकस्यानुख्यात्यै ॥ [४४] ॥

(यावन्तो ऽस्य मुखत श्चित्यस्य वर्द्धय त्यादित्यो ऽष्टाविꣳशतिश्च) ॥ ८ ॥

---

षड्भिर् दीक्षयति षड् वा ऋतव ऋतुभिरेवैनन्दीक्षयति सप्तभिर् दीक्षयति सप्त छन्दाꣳसि
छन्दोभिरेवैनन्दीक्षयति विश्वे देवस्य नेतुरित्यनुष्टुभोत्तमया जुहोति वाग् वा अनुष्टुप् तस्मात्
प्राणानाँव्वागुत्तमैकस्मादक्षरादनाप्तम्प्रथमम्पदन्तस्माद्यद्वाचोऽनाप्तन्तन्मनुष्या उप जीवन्ति

पूर्णया जुहोति पूर्ण इव हि प्रजापतिः ॥ [४५] ॥ प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजाना२ सृष्ट्यै यदर्चिषि प्रवृञ्ज्याद्भूतमव रुन्धीत यदङ्गारेषु भविष्यदङ्गारेषु प्र वृणक्ति भविष्यदेवाव रुन्धे भविष्यद्धि भूयो भूताद्द्वाभ्याम्प्र वृणक्ति द्विपाद् यजमानः प्रतिष्ठित्यै ब्रह्मणा वा एषा यजुषा संभृता यदुखा सा यद्भिद्येताऽऽर्तिमार्च्छे ॥ [४६] ॥ द्यजमानो हन्येतास्य यज्ञो मित्रैतामुखान्तपेत्याह ब्रह्म वै मित्रो ब्रह्मन्नेवैनाम्प्रति ष्ठापयति नाऽऽर्तिमार्च्छति यजमानो नास्य यज्ञो हन्यते यदि भिद्येत तैरेव कपालैः स२ सृजेथ् सैव ततः प्रायश्चित्तिर् यो गतश्रीः स्यान्मथित्वा तस्याव दध्याद्भूतो वा एष स स्वां ॥ [४७] ॥ देवतामुपैति यो भूतिकामः स्याद् य उखायै संभवेथ् स एव तस्य स्यादतो ह्येष संभवत्येष वै स्वयंभूर् नाम भवत्येव यङ्कामयेत भ्रातृव्यमस्मै जनयेयमित्यन्यतस्तस्याऽऽहृत्याव दध्याथ् साख्षादेवास्मै भ्रातृव्यं जनयत्यंबरीषादन्नकामस्याव दध्यादंबरीषे वा अन्नम्भ्रियते सयोन्येवान्न ॥ [४८] ॥ मव रुन्धे मुञ्जानव दधात्यूर्ग् वै मुञ्जा ऊर्जमेवास्मा अपि दधात्यग्निर् देवेभ्यो निलायत स क्रुमुकम्प्राविशत् क्रुमुकमव दधाति यदेवास्य तत्र न्यक्तन्तदेवाव रुन्ध आज्येन सय्यौत्येतद् वा अग्नेः प्रियन्धाम यदाज्यम्प्रियेणैवैनन्धाम्ना समर्द्धयत्यथो तेजसा ॥ [४९] ॥ वैकंकतीमा दधाति भा एवाव रुन्धे शमीमयीमा दधाति शान्त्यै सीद त्वम्मातुरस्या उपस्थ इति तिसृभिर् जातमुप तिष्ठते त्रय इमे लोका एष्वेव लोकेष्वाविदङ्गच्छत्यथो प्राणानेवाऽऽत्मन् धत्ते ॥ [५०] ॥

(प्रजापतिर् ऋच्छेथ् स्वा मेवान्नं तेजसा चतुस्त्रिं२शच्च) ॥ ९ ॥

न ह स्म वै पुराऽग्निरपरशुवृक्णन्दहति तदस्मै प्रयोग एवर्षिरस्वदयद्यदग्ने यानि कानि चेति समिधमा दधात्यपरशुवृक्णमेवास्मै स्वदयति सर्वमस्मै स्वदते य एवव्वेँदौदुंबरीमा दधात्यूर्ग् वा उदुंबर ऊर्जमेवास्मा अपि दधाति प्रजापतिरग्निमसृजत त२ सृष्ट२ रख्षा२ुस्य ॥ [५१] ॥ जिघा२सन्थ् स एतद्राख्षोघ्नमपश्यत् तेन वै स रख्षा२ुस्यपाहत यद्राख्षोघ्नं भवत्यग्नेरेव तेन जाताद्रख्षा२ुस्यप हन्त्याश्वत्थीमा दधात्यश्वत्थो वै वनस्पतीना२ सपत्नसाहो विजित्यै वैकङ्कतीमा दधाति भा एवाव रुन्धे शमीमयीमा दधाति शान्त्यै स२शितम्मे ब्रह्मोदेषाम्बाहू अतिरमित्युत्तमे औदुंबरी ॥ [५२] ॥ वाचयति ब्रह्मणैव ख्षत्र२ सं२ श्यति ख्षत्रेण ब्रह्म

तस्माद् ब्राह्मणो राजन्यवानत्यन्यम्ब्राह्मणन्तस्माद्राजन्यो ब्राह्मणवानत्यन्यꣳ राजन्यम्मृत्युर् वा एष यदग्निरमृतꣳ हिरण्यꣳ रुक्ममन्तरम्प्रति मुञ्चतेऽमृतमेव मृत्योरन्तर् धत्त एकविꣳशतिनिर्बाधो भवत्येकविꣳशतिर् वै देवलोका द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य ॥ [५३] ॥ एकविꣳश एतावन्तो वै देवलोकास्तेभ्य एव भ्रातृव्यमन्तरेति निर्बाधैर् वै देवा असुरान् निर्बाधेऽकुर्वत तन्निर्बाधानान्निर्बाधत्वन्निर्बाधी भवति भ्रातृव्यानेव निर्बाधे कुरुते सावित्रिया प्रति मुञ्चते प्रसूत्यै नक्तोषासेत्युत्तरयाऽहोरात्राभ्यामेवैनमुद्यच्छते देवा अग्निन्धारयन् द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा अहोरात्राभ्यामेवैनमुद्यत्य ॥ [५४] ॥ प्राणैर् दाधाराऽऽसीनः प्रति मुञ्चते तस्मादासीनाः प्रजाः प्र जायन्ते कृष्णाजिनमुत्तरन्तेजो वै हिरण्यम्ब्रह्म कृष्णाजिनन्तेजसा चैवैनम्ब्रह्मणा चोभयतः परि गृह्णाति षडुद्यामꣳ शिक्यम्भवति षड् वा ऋतव ऋतुभिरेवैनमुद्यच्छते यद् द्वादशोद्यामꣳ सँव्वथ्सरेणैव मौञ्जम्भवत्यूर्ग् वै मुञ्जा ऊर्जैवैनꣳ स मर्द्धयति सुपर्णोऽसि गरुत्मानित्यवेक्षते रूपमेवास्यैतन् महिमानवँ्व्याचष्टे दिवङ्गच्छ सुवः पतेत्याह सुवर्गमेवैनँल्लोकङ्गमयति ॥ [५५] ॥

(रख्षाꣳस्यौ दुंबरी आदित्य उद्यत्य सं चतुर्विꣳशतिश्च) ॥ १० ॥

समिद्धो अञ्जन् कृदरम्मतीनाङ्घृतमग्ने मधुमत् पिन्वमानः। वाजी वहन् वाजिनञ्जातवेदो देवानावँ्वख्षि प्रियमा सधस्थम्॥ घृतेनाञ्जन्थ् सम्पथो देवयानान् प्रजानन् वाज्यप्येतु देवान्। अनु त्वा सप्त प्रदिशः सचन्ताꣳ स्वधामस्मै यजमानाय धेहि॥ ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेद्ध्यश्च सप्ते। अग्निष्ट्वा ॥ [५६] ॥ देवैर् वसुभिः सजोषाः प्रीतवँ्वह्निवँ्वहतु जातवेदाः॥ स्तीर्णम्बर्हिः सुष्टरीमा जुषाणोरु पृथु प्रथमानम्पृथिव्याम्। देवेभिर् युक्तमदितिः सजोषाः स्योनङ्कृण्वाना सुविते दधातु॥ एता उ वः सुभगा विश्वरूपा वि पख्षोभिः श्रयमाणा उदातैः। ऋष्वाः सतीः कवषः शुंभमाना द्वारो देवीः सुप्रायणा भवन्तु॥ अन्तरा मित्रावरुणा चरन्ती मुखयँ्यज्ञानामभि सँव्विदाने। उषासा वाꣳ ॥ [५७] ॥ सुहिरण्ये सुशिल्पे ऋतस्य योनाविह सादयामि॥ प्रथमा वाꣳ सरथिना सुवर्णा देवौ पश्यन्तौ भुवनानि विश्वा। अपिप्रयञ्चोदना वाम्मिमाना होतारा ज्योतिः प्रदिशा दिशन्ता॥ आदित्यैर् नो भारती वष्टु यज्ञꣳ सरस्वती सह

रुद्रैर् न आवीत्। इडोपहूता वसुभिः सजोषा यज्ञन्नो देवीरमृतेषु धत्त॥ त्वष्टा वीरन्देवकामञ्ज-
जान त्वष्टुरर्वा जायत आशुरश्वः ॥ [५८] ॥ त्वष्टेदव्विँश्वम्भुवनञ्जजान बहोः कर्तारमिह यक्षि
होतः॥ अश्वो घृतेन त्मन्या समक्त उप देवाꣳ ऋतुशः पाथ एतु। वनस्पतिर् देवलोकम्प्रजा-
नन्नग्निना हव्या स्वदितानि वक्षत्॥ प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने।
स्वाहाकृतेन हविषा पुरोगा याहि साद्ध्या हविरदन्तु देवाः ॥ [५९] ॥

(अग्निष्वा वा मश्वो द्विचत्वारिꣳशच्च) ॥ ११ ॥

## समाप्ति कोर्वैः

(सावित्राणि व्यृद्ध मुत्क्राम देवस्य खनति क्रूरं वारुणः सप्तभि रेकविꣳशत्या षड्भिर् न ह स्म समिद्धो अञ्ज न्नेकादश)
(सावित्रा ण्युत्क्राम क्रूरं वारुणः पशवः स्युर् न ह स्म नवपञ्चाशत्)
(सावित्राणि हविरदन्तु देवाः)

॥ हरिः ॐ ॥

पञ्चमकाण्डे प्रथमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ५९ |

ॐ